निशाचरी मम गृहान्तरालं गते" त्युद्भटः । ब० । तद्वति त्रि० ।

**अनिर्वेद** पु० न निर्वेदः अभावार्थे न०त० । निर्वेदाभावे वैराग्याभावे अवैराग्ये, असन्तोषे च "अनिर्वेदः श्रियोमूलमनिर्वेदमयं सुखम्" "अनिर्वेदो हि सततं सर्वार्थेष्वनुवर्त्तते" इति रामा० ।

**अनिल** पु० अनित्यनेन अन—इलच् । वायौ, तेनैव सर्वेषां प्राणधारणात्तत्त्वम् । "तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्" इति सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य चेति" मनुः । "स सखा दीप इवानिलाहत" इति कुमा० । अनिलश्च मायासहकृतेन ब्रह्मणा वियदुत्पाद्य तद्रूपाविष्टेन ततोदशांशत उत्पादितः द्रव्यभेदः 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशात् वायुः वायोरग्निरित्यादिश्रुतिः, स च स्वाभाविकशोषस्पर्शगतिवेगाख्यगुणवान् वियत उत्पन्नत्वात् शब्दगुणवांश्च । यथोक्तं पञ्चदश्यां "माया सत्येकदेशस्था यथा तत्रैकदेशगम् । वियत्, तत्राप्येकदेशगतो वायुः प्रकल्पितः । शोषस्पर्शौगतिर्वेगो वायुधर्म्मा इमे मताः । त्रयः स्वभावात् सन्मायाव्योम्नां ये तेऽपि वायुगाः । वायुरस्तीति सद्भावः, सतोवायौ पृथक्कृते । निस्तत्त्वरूपो मायायाः स्वभावो वियतोध्वनिरिति "पुराणोक्तं तारतम्यं दशांशे भूतपञ्चके" इति च । तदाविष्टेनैव ब्रह्मणा वह्निरुत्पादित इति वेदान्तिमतम् सांख्यमते स तु स्पर्शतन्मात्रादुत्पन्नः । वैशेषिकनये तु स्पर्श, संख्या, परिमाण, पृथक्त्वसंयोगविभागपरत्वापरत्ववेग-गुणकोऽनिलः ईश्वरादेव अदृष्टवशादुत्पद्यते इति भेदः स च स्थूलः सूक्ष्मश्च । तत्र स्थूलः सप्तविधः सप्तस्कन्धाश्रितः यथोक्तं सिद्धान्तशिरमणौ "भूवायुरावह इह प्रवहस्तदूर्द्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च । अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्मादुवाहयः परावह इमे पवनाः प्रसिद्धाः । भूमेर्बहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम् । तदूर्द्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था । नक्षत्रकक्षा खचरैः समेतो यस्मादतस्तेन समाहतोऽयम् । भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन इति" । भूवायौ विद्युदादय उत्पद्यन्ते इत्युक्तम् तेषां स्वरूपादि तट्टीकायामुक्तं श्रीपतिवाक्येन । "निर्घातोल्काघनसुरधनुर्विद्युदन्तः कुवायोः संदृश्यन्ते खनगरपुरीवेषपूर्व्वं तथान्यत्" इति । तत्र विद्युतः । "सुजलजलधिमध्ये वाड़वोऽग्निः स्थितोऽस्मात् सलिलभरनिमग्नादुत्थिता धूममाला । वियति पवननीताः सर्वतस्ता द्रवन्ति द्युमणिकिरणतप्ता विद्युतस्तत्स्फुलिङ्गाः" । करकाः । "उद्धूतैः पांसुभिर्भूमेः प्रचण्डपवनोच्चयात् । मेघमण्डलमानीतैर्मालिन्यपरिवर्जितैः । मिश्रणाज्जलविन्दूनां पिण्डभावो भवेदिह । दृषद्वन्निपतन्त्येते द्रवन्ते च पुनः क्षितौ" । विद्युत्पातसंभवस्तु । "अकस्माद्वैद्युतं तेजः पार्थिवांशकमिश्रितम् । वात्यावद्भ्रमदाघाते प्रतिकूलानुकूलयोः । वाय्वोस्तत् पतति प्रायो ह्यकालं प्राप्य वर्षणे । यतः प्रावृषि नैवेते पांसवः प्रसरन्ति हि । तत् त्रेधा पार्थिवं चाप्यं तैजसं, तत्तदुत्थितः । गतो निर्भरदाहैश्च भूमिस्थैरनुभूयते" । इन्द्रधनुः । "सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः, । परिवेषः । "संमूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः । नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषः" । उल्का । "यासां गतिर्दिवि भवेद्भ्रमणेन शश्वत् तास्तारकाः सकलखेचरतोऽतिदूरे । तिष्ठन्ति या अनियतोद्गतयश्च ताराश्चन्द्रादधो हि निवसन्ति तदाश्रितास्ताः । शीतांशुवज्जलमयास्तपनात् स्फुरन्ति तास्त्वावहप्रवहमारुतसंधिसंस्थाः । पूर्वानिलैस्तिमितभावमुपागतेऽस्मिंस्ताराः पतन्ति कुहचिद्गुरुतावशेन" । अथ रजःसंहृतिः । "वर्षान्ते निर्जला मेघा वायुना विरलीकृताः । ईषद्बाष्पावशेषास्तु पतन्ति वसुधातले । धूमावयवरूपैस्तैश्छाद्यन्ते गिरयो द्रुमाः । रामारामादयस्ते तु पुनरर्कांशुशोभिताः । भूवायुना विशीर्णास्तु विलीयन्ते नभस्तले । तद्रजःसंहृतिर्धेनुमहिषीक्षीरनाशकृत्" । संध्यारागः । "भूम्युत्थितै रजोधूमैर्दिगन्तव्योम्नि संस्थितैः । सूर्य्याल्पकिरणैर्मिश्रैरारुणमवभासते । विरलावयवं वस्तु यद्दृष्टेर्व्यवधायकम् । तेनाभ्रमरुणीभूतं दृश्यते शक्रचापवत् । संध्यारामः स विज्ञेयो दिनादौ च दिनात्यये । राकायां तु निशावक्त्रे तथैवेन्दुकरोद्गमे" इति । तदधिष्ठातृदेहोत्पत्तिर्मन्वन्तरभेदेन वामनपुराणादौ दर्शिता यथा 'पुलस्त्य उवाच । प्रविश्य जठरं शुद्धोदैत्यमातुः पुरन्दरः । ददर्शोर्द्धमुखं बालं कटिन्यस्तकरं महत् ॥ तेनैव गर्भं दितिजं वज्रेण शतपर्वणा । चिच्छेद सप्तधा ब्रह्मन् ! स रुरोद सुविस्वरम् । शक्रोऽपि प्राह मा मूढ़! रुदस्वेति सुघर्घरम् । इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा ॥ ते जाता मरुतो नाम देवादित्याः शतक्रतोः । मातुरेवापचारेण बलवीर्य्यपुरस्कृताः इति ॥ "यदमी भवता प्रोक्ता मरुतोदितिसम्भवाः । तत् केन पूर्व्वमासन् वै मरुन्मार्गेण कथ्यतामिति" नारद-